[1]प्राध्वंकृत्य, [2]जीविंकाकृत्य-उपनिषत्कृत्य, तिरस्कृत्य-तिरःकृत्य, उपाजेकृत्य-अन्वाजेकृत्य, [A]साक्षात्कृत्य, उरसिकृत्य-मनसिकृत्य, मध्येकृत्य-पदेकृत्य-निवचनेकृत्य, [3]लवणङ्कृत्य, विकार्य, प्रचिकीर्ष्य, प्रचेक्रीय्य;

[4B]भीतङ्कारं-[C]चोरङ्कारं (आक्रोशति), [5]स्वादुङ्कारं[D] (भुङ्क्ते), सम्पन्नङ्कारम्-लवणङ्कारम्, [6]अन्यथाकारं-एवङ्कारं-[E]कथङ्कारं-इत्थङ्कारं (भुङ्क्ते), [7]यथाकारं[F] (अहं भोक्ष्ये) तथाकारं (भोक्ष्ये, किं तवानेन ?), [8]अकृतकारं (करोति), नीचैःकारं-[G]उच्चैःकारं, तिर्यक्कारम्, करतः-

1. 'प्राध्वं बन्धने' (1-4-78) इति नित्यं गतिसंज्ञायां समासे ल्यप्। प्राध्वंकृत्य=बन्धनेनाकूलं कृत्वेत्यर्थः।
2. 'जीविकोपनिषदावौपम्ये' (1-4-79) इति नित्यगतिसंज्ञायां समासे ल्यप्।
3. साक्षात्प्रभृतिषु (1-4-74) लवणशब्दस्य गतिसंज्ञासन्नियोगेन मान्तत्वं निपात्यते, तेन लवणंकृत्येति भवति।
4. 'कर्मण्याक्रोशे कृञः खमुञ्' (3-4-25) इति खमुञ् खित्त्वात् पूर्वपदस्य मुम्।
5. 'स्वादुमि णमुल्' (3-4-26) इति णमुल्। 'स्वादुमि' इति स्वादुपर्यायाणामपि ग्रहणम्; तेन लवणङ्कारं, सम्पन्नङ्कारम् इत्यपि सिध्यति। उपपदस्य मान्तत्वं निपातनात्।
6. 'अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत्' (3-4-27) इति णमुल्। अन्यथा भुङ्क्ते इत्यर्थः।
7. 'यथातथयोरसूयाप्रतिवचने' (3-4-28) इति णमुल्।
8. 'समूलाकृतजीवेषु हन्कृञ्ग्रहः' (3-4-36) इति णमुल्। 'कषादिषु यथाविध्यनुप्रयोगः' (3-4-46) इत्यनुप्रयोगः।

A. 'साक्षात्कृत्याभिमन्येऽहं त्वां हरन्तीं श्रियं श्रियः॥' भ. का. 5-71.

B. 'तं भीतङ्कारमाक्रुश्य रावणः प्रत्यभाषत।' भ. का. 5-39.

C. 'भुजविटपमदेन व्यर्थमन्धम्भविष्णुः धिगपसरसि चोरङ्कारमाक्रुश्यमानः।
त्वदुरसि विदधातु स्वामपस्कारकेलिं कुटिलकरजकोटिक्रूरकर्मा जटायुः॥'
अनर्घराघवे 5.11.

D. 'स्वादुङ्कारं कालखण्डोपदंशं क्रोष्टा डिम्भं व्यष्वणत् व्यस्वनच्च॥'
शिशुपालवधे-18-77.

E. 'अकृत्वा हेलया पादम् उच्चैर्मूर्धसु विद्विषाम्।
कथङ्कारमनालम्बा कीर्तिर्द्यामधिरोहति॥' शिशुपालवधे 2-52.

F. 'किं त्वमेवं ब्रवीषीति पृष्टेऽन्यो वक्त्यमर्षतः।
यथाकारमहं जाने तथाकारं वदाम्यहम्॥' इति प्रक्रियासर्वस्वे।

G. 'समूलकाषं चकषुः रुदन्तो रामान्तिकं बृंहितमन्युवेगाः।
आवेदयन्तः क्षितिपालमुच्चैःकारं मृतं रामवियोगशोकात्॥' भ. का. 3-49.